This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीगणेशाय नमः॥ स्वातममरवपूजितपादं शांतपथमनसोप्यगोचराकारं विकसितजलरुहनेत्रं सितांछायांकमाश्रये ब्रह्म॥१॥ इह भगवान्शंकराचार्य उत्तमाधिका
रिणं वेदांतप्रस्थानत्रयं निर्मायापि तदवलोकनासमर्थानां मंदबुद्धीनां मनुग्रहार्थं सर्ववेदांतसिद्धांतसंग्रहरूपमात्मबोधाख्यं प्रकरणं दर्शयिष्यन् प्रतिजानीते॥ कृच्छ्रचांद्रा
यण॥ नित्यनैमित्तिकाद्यनुष्ठानरूपैस्तपोभिः क्षीणानि पापानि रागाद्यंतःकरणदोषाः तेषां नित्यनैमित्तिकेषु फलं कुर्वाणो यतीवचनात् अतएव शांतानामत्रहोभिलाशा
यानां इहामुत्रार्थफलभोगरहितानां मुमुक्षूणां संसारनिवृत्तिपरं नेकनप्रयत्नानां यथोक्तसाधनसंपन्नानां मयमात्मबोधो विधीयते विधिपुरःसरेणावश्यकर्तव्यं प्रतिपा
द्यत इत्यर्थः॥१॥ ननु तपोयोगमंत्राद्यज्ञाद्यनेकसाधनेषु सत्सु मोक्षं प्रति बोधस्यैव किमिति प्राधान्येनाभ्यनुज्ञा इत्यत आह॥ तपोयोगमंत्रकर्मयोगादिष्वनेकसाधनानिष

तपोभिः क्षीणपापानां शांतानां वीतरागिणां॥ मुमुक्षूणामपेक्ष्योऽयमात्मबोधो विधीयते॥१॥ बोधोऽन्यसाधनेभ्यो हि सा
क्षान्मोक्षैकसाधनं॥ पाकस्य वह्निवज्ज्ञानं विना मोक्षो न सिध्यति॥२॥ अविरोधितया कर्म नाविद्यां विनिवर्तयेत्॥ विद्याविद्यां
निहंत्येव तेजस्तिमिरसंघवत्॥३॥ अवच्छिन्न इवाज्ञानात्तन्नाशे सति केवलः॥ स्वयं प्रकाशते ह्यात्मा मेघापायेंऽशुमानिव॥४॥

रं परमार्थमेवं ज्ञानद्वारा मोक्षं साधयति॥ ज्ञानं तु स्वजन्ममात्रादेवाज्ञानं सर्वं निःशेषं नाशयित्वा मुमुक्षुं स्वाराज्येऽभिषेचयति॥ अतो अन्यसाधनेभ्यो ज्ञानस्य प्राधान्य राम
मुक्तं॥ न दैवदृष्टांतेन द्रढयति॥ पाकस्येति॥ यथा लोके पचनक्रियायां काष्ठजलभांडादिषु साधनेषु सत्सु वह्निं विनान्नसिद्धिर्न तद्वत् ज्ञानं विना मोक्षो न सिद्धतीत्य ॥१॥
र्थः॥२॥ ननु कर्मणां विचित्रशक्तिमत्त्वात्कर्मैव किंचिद्ज्ञानं नाशयति॥ किमात्मज्ञानेनेत्याशंक्य कर्माज्ञानयोः विरोधाभावान्नैवमित्याह॥ कर्मणो विद्याऽवि
रोधाभावादज्ञानं नाशयितुं कर्म न उत्सहते॥ विद्या तु प्रकाशरूपत्वात् अंधतमसं तेजःपुंज इव नाशयितुं समर्थ इत्यर्थः॥३॥ ननु प्रतिशरीरमात्मा परिच्छिन्न एवोपलभ्यते
कथमस्य कैवल्यमित्यत आह॥ परिपूर्णस्याद्वितीयस्यात्मनः अज्ञानपरिकल्पितो घटवच्छरीराध्यासस्तया परिच्छिन्नत्वमविवेककृतमेव ननु तत्त्वदृष्ट्या अनो

Acc. No. - 29 M1027
Title:- आत्मबोध
Author:- शंकराचार्य
Subject:- philosophical poetry
पेजे:- (14)

(1)

KKSU LIBRARY RAMTEK 441 106 M1027 Dist. Nagpur

...cked 2012

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विवेकं विनात्मा केवल एव प्रकाशते मेघावरणाभावेन हेतुसिद्धिरित्याह॥ अज्ञानकार्यफलेरहमात्मादिभिः कलुषीकृतं कर्तृत्वभोक्तृत्वाद्यभिमानिनं जीवं ज्ञा
नं कर्तुं चिरकालाभ्यासात् अज्ञानहननद्वारेण कार्यांतःकरणादिकं निःशेषं नाशयित्वा स्वयमपि नश्यति। अज्ञानकार्यत्वाद्धेतोः तस्यापि विवर्तज्ञानं आत्माभासत्वा
त्॥ आत्मन्येकीभवति॥ इदानीं आद्वयं एवात्माधिकारात्। यथा कतकरेणुराविलं जलं निर्मलं कृत्वा स्वयमपि नश्यति तद्वदित्यर्थः॥५॥ ननु अपरोक्षतयानुभूय
मानस्य संसारस्य कथं मत्यंतासत्त्वं वक्तुं प्रत्यक्षविरोधादित्याशंक्य स्वप्नदृष्टांतेन तस्य मिथ्यात्वं साधयति॥ रागद्वेषादिभिः संकुलायमानः संसारः स्वका
ले स्वस्याज्ञाने स्थिते सति तावन्मिथ्याभूतोऽपि संसारः सत्य इव भाति॥ प्रबोधे सति वाक्यश्रवणात् आत्मज्ञानोत्पत्तौ अन्यथा भाति। अत्र दृष्टांतः स्वप्नतुल्य इति स्व

अज्ञानकलुषं जीवं ज्ञानाभ्यासाद्धि निर्मलं। कृत्वा ज्ञानं स्वयं नश्येज्जलं कतकरेणुवत्॥५॥ संसारः स्वप्नतुल्यो हि रागद्वेषादिसंकुलः॥
स्वकाले सत्यवद्भाति प्रबोधे सत्यवद्भवेत्॥६॥ तावत्सत्यं जगद्भाति शुक्तिकारजतं यथा॥ यावन्न ज्ञायते ब्रह्म सर्वाधिष्ठानमव्ययं॥७॥
सच्चिदात्मन्यनुस्यूते नित्ये विष्णौ प्रकल्पिताः॥ व्यक्तयो विविधाः सर्वा हाटके कटकादिवत्॥८॥ उपादाने खिलाधारे जगति परमेश्वरे॥
सर्गस्थितिलयं यांति बुद्बुदा इव वारिणि॥९॥

प्नोऽपि यावन्निद्रानुवर्तते तावन्मिथ्याभूतोऽपि सत्य इव भाति॥ प्रबोधे निद्रानाशे मिथ्याभूतोऽपि लघुरित्यर्थः॥६॥ मिथ्याभूतत्वमेव दृष्टांतान्तरेण दृढयति॥ तावदि
ति॥ यथा नीलपृष्ठत्रिकोणादिविशेषज्ञाने मद्यतेलावर्जनं रजतं सत्यमिवानुभूयते तदधिष्ठानभूतं सच्चिदानंदाद्वयं ब्रह्म यावन्न ज्ञायते तावदज्ञानानुभूयते
तावज्जगदाकारेण परिणतः संसारः सत्य एव भाति॥ यादृश्यत इत्यर्थः॥७॥ सर्वं दृश्यं प्रपंचजातं ब्रह्मण्येव मायापरिकल्पितमिति प्रतिपादयति॥ सत्यज्ञानानंदात्म
नि नित्ये सर्वानुस्यूते विष्णौ व्यापके ब्रह्मणि सर्वा व्यक्तयः देवतिर्यङ्नरस्थावरजंगमादयो विविधाः अपि व्यक्तयः सर्वोपादानभूते परमेश्वरे हेम्नि कटक
मुकुटादय इव कल्पिताः एवं ब्रह्मणः अभिन्ना इत्यर्थः॥८॥ तत्रैव दृष्टांतः उपादाने खिलाधारे निपूर्वं लिखितमंत्रं तेयां॥९॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्म बो
२।

उक्तमर्थमाकाशदृष्टान्तेन द्रढयति।। हृषीकेशः मनःप्रभृतिसर्वेन्द्रियप्रवर्तकः नियामको वा विभुः सर्वगतः परमेश्वरः स्वमायया परिकल्पितनानोपाधिषु प्रतिबिंबितः स-
न्नानेव भाति।। तन्नाशे सति ब्रह्मात्मैक्यज्ञानेन तेषां मायापरिकल्पितानां देहेंद्रियोपाधीनां नाशे सति केवल एक एव भाति। यथा एक एवाकाशो मठघटाद्युपाधिष्वेक-
त्वेन नानाविधो भाति। उपाधिलयादेकवद्भाति। तद्वदित्यर्थः।।१०।। ननु सर्वदेहेषु तज्जात्यादिभिरनुविद्धस्यैकस्य नित्यत्वमुच्यते इत्यत आह।। सर्वोऽपि नानोपाधिवशादेव
स्मिन् जातिनामादयः आरोपिताः मायापरिकल्पिताः न तु स्वतः यथा स्वभावमधुरं जलं कटु तिक्तं मधुरं लवणं रक्तं पीतादि द्रव्योपेतं तत्तद्रूपं भवति न तु स्वरूपेण तद्व-
दित्यर्थः।।११।। आत्मनो विद्यापरिकल्पितोपाधिमाह।। पंचानां भूतानां द्वन्द्वे एकैकं द्विधा विभज्य तत्रैकं अर्द्धं चतुर्धा समं विभज्य च त्येकं स्वांशं परित्यज्यान्यत्वे योजनं पं-

।।यथाकाशो हृषीकेशो नानोपाधिगतो विभुः।। तद्भेदाद्भिन्नवद्भाति तन्नाशे सति केवलः।।१०।। नानोपाधिवशादेव जातिवर्णाश्रमादयः।।
आत्मन्यारोपितास्तोये रसवर्णादिभेदवत्।।११।। पंचीकृतमहाभूतसंभवं कर्मसंचितं।। शरीरं सुखदुःखानां भोगायतनमुच्यते।।१२
पंचप्राणमनोबुद्धिदशेन्द्रियसमन्वितं।। अपंचीकृतभूतोत्थं सूक्ष्मांगं भोगसाधनं।। अनाद्यविद्यानिर्वाच्या कारणोपाधिरुच्यते।।
उपाधित्रितयादन्यमात्मानमवधारयेत्।।१३।।

विकरणं।। एवं पंचीकृतेभ्यः स्थूलं पृथिव्यादिमहाभूतेभ्यः संभवो यस्य तत्संभूतं प्रारब्धकर्मभिः संचितं रचितं स्थूलं शरीरं सुखदुःखभोगानामायतनं भोग- रा म
स्थानं प्रत्यगात्मन इति।।१२।। सूक्ष्मोपाधिमाह।। पंच प्राणाः एकस्यैव महाप्राणस्य प्राणादयो वृत्तयः ज्ञानेन्द्रियकर्मेन्द्रियभेदेन दशेन्द्रियाणि दश मनः आद्येन ।।२
संकल्पविकल्पात्मकांतःकरणवृत्तिः बुद्धिः निश्चयात्मिका एताभ्यां संयुक्तं अपंचीकृतभूतेभ्यः उत्थं जातं सूक्ष्मांगं लिंगशरीरं सुखदुःखसाधनमित्यर्थः
।।१३।। तृतीयं कारणोपाधिमाह।। सदसद्भ्यामनिर्वचनीया अविद्या अनादि ज्ञाना कारणोपाधिरुच्यते।। सा च समष्टिव्यष्टिरूपेण स्थूलसूक्ष्मप्रपंचयोः
कारणं सृजत्वात्कारणोपाधिरुच्यते।। उपाधित्रितयकथनेप्रयोजनमाह।। उपाधित्रितयादन्यमिति।। तत्त्रितयाद्भिन्नमात्मानमवधारयेत्।। ज्ञानी यावदित्यर्थः।।१४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ननु अन्नमयादिषु कोशेषु व्याप्य तन्मयतया स्थितस्य कुतो नित्यमुक्तत्वमित्याशंक्याह ॥ अन्नमयप्राणमयमनोमयविज्ञानमयआनंदमयाः पंच कोशाः आदिशब्देन अन्ना
नादीनां ग्रहणं ॥ एतैर्योगेन मिथ्यातादात्म्येन तत्तन्मय इव स्थितः आत्मा शुद्धः न तु तेषु वस्तुतो रंजनाविशेषोपि ॥ स वा एष पुरुषोऽन्नरसमयः इत्यादिभिः सूक्ष्मवस्तुदर्शना
र्थमेवोपाधिप्रस्तरन्यति ॥ ननु तत्त्वदृष्ट्या यथा निर्मलस्फटिकनीलपीतवस्त्रादियोगेन तत्तन्मय इव भाति ॥ वस्तुतो नास्ति तेषां रंजना तद्वदित्यर्थः ॥१५॥ असंगात्म
स्वरूपज्ञानविवेचनप्रकारमाह ॥ पंचकोशैः तावदात्मनि स्थितं वपुः स्थूलशरीरं तुषादिभिर्युक्तं तंदुलमिव युक्त्यावघातेन अवहननात् पश्चाच्छुद्धमानं विविच्यात् विवेके
न जानीयात् ॥ अयं स्थूलदेहो नात्मा कुतः कार्यत्वात् घटवत् सूक्ष्मदेहोपि नात्मा देहत्वात् स्थूलदेहवत् इति अनुमानादिना तेभ्यः कोशेभ्यो भिन्नं आत्मानं जानीयादि

पंचकोशादियोगेन तत्तन्मय इव स्थितः ॥ शुद्धात्मा नीलवस्त्रादियोगेन स्फटिको यथा ॥१५॥ वपुस्तुषादिभिः कोशैः युक्तं युक्त्यावघाततः ॥ आत्मानमंत
रं शुद्धं विविच्यात्तंदुलं यथा ॥१६॥ सदा सर्वगतोप्यात्मा न सर्वत्रावभासते ॥ बुद्धावेवावभासेत स्वच्छेषु प्रतिबिंबवत् ॥१७॥ देहेंद्रियमनोबुद्धिप्रकृतिभ्यो
विलक्षणं ॥ तद्वृत्तिसाक्षिणं विद्यादात्मानं राजवत्सदा ॥१८॥ व्यापृतेष्विंद्रियेष्वात्मा व्यापारीवाविवेकिनां ॥ दृश्यतेऽभ्रेषु धावत्सु धावन्निव यथा शशी ॥१९॥

त्यर्थः ॥१६॥ ननु आत्मा चेत्सर्वगतः तर्हि किं न सर्वत्र सर्वैर्दृश्यते तत्राह ॥ आत्मा सर्वगतोपि सर्वव्यापकः स्थितोपि जडे बाह्ये व्याप्ततात्वेन प्रकाशते रागादिभिरपविद्धा
यां बुद्धावेवावभासते न सर्वत्र यथा प्रतिबिंबः स्वच्छेष्वेव दर्पणादिषु दृश्यते नान्यत्र तद्वदित्यर्थः ॥१७॥ देहस्थितस्यात्मन औदासिन्यं राजपुरुषदृष्टांतेनाह
शुद्धात्मानं तद्वृत्तीनां साक्षिणं तथा स्थितं प[illegible]था राजा स्वनगरे स्थितोपि मंत्रिषु चरत्सु मानेषु स्वयं साक्षीतया तान् पश्यन् तिष्ठति ॥ तद्वदेव जानीयादित्यर्थः
॥१८॥ ननु आत्मनो विकारित्वमयुक्तं सर्वदा व्यापारवान् दृश्यते तत्राह ॥ इंद्रियादिषु स्वविषयेषु व्यापृतेषु सत्सु आत्मा व्यापारीव अविवेकिनां गुरुशास्त्रो
पदेशरहितानां दृश्यते न तु तत्त्वदृशां यथा मेघखंडेषु वायुवशाद्धावत्सु चंद्रोपि धावतीव लोकैः दृश्यते न तु चंद्रमा धावति तथात्मापि न धावति इत्यर्थः ॥१९॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

आत्म
॥३॥

ननु देहेंद्रियमनोबुद्ध्योपि सचेतना दृश्यंते किमात्मन सत्त्वाह॥ नित्यज्ञानस्वरूपस्य आत्मचैतन्यमाश्रित्य देहेंद्रियमनोबुद्धयः स्वकीयार्थेषु वर्त्तंते॥ यथा जनाः शालिनः
सूर्यप्रकाशमाश्रित्य स्वव्यापारेषु व्यवहरंति। अतश्चैतन्यस्य ज्ञानमात्मन एव देहेंद्रियादयस्तु जडा एवेत्यर्थः॥२०॥ नन्वहं जातोस्मि बाल्यकौमारयौवनावस्थामनुभ
वामि परस्यामि अनवरतमनूभूयमानस्यात्मनः कथमविकारित्वमुच्यते तत्राह। देहेंद्रियमनोबुद्धिधर्मान् गुणांश्च सत्त्वादीन् कर्माणि कर्मेंद्रियव्यापारान्
तेपि ध्यानानात्मने न स्थिते निर्मले असंगरूपे सच्चिदानंदात्मके परमात्मन्येतत्सामीप्यादिविवेकतोध्यस्यंति। यथा गगने नीलतादिवत्॥ अतस्ते आत्मधर्मा
न भवंति अपितु देहादीनामेवेत्यर्थः॥२१॥ ननु कर्तृत्वभोक्तृत्वादिकमात्मनि अनवरतमनुभूयमानत्वात् अतः दुर्निवारमित्याशंक्य तदपि तस्यैव मिथ्या स्या

आत्मचैतन्यमाश्रित्य देहेंद्रियमनोधियः॥ स्वकार्यार्थेषु वर्त्तंते सूर्यालोकं यथा जनाः॥२०॥ देहेंद्रियगुणान् कर्माण्यमले सच्चिदात्मनि॥
अध्यस्यंत्यविवेकेन गगने नीलतादिवत्॥२१॥ अज्ञानान्मानसोपाधेः कर्तृत्वादीनि चात्मनि॥ कल्प्यंतेंबुगते चंद्रे चलनादि यथांभसः॥२२॥ रागेच्छा
सुखदुःखादि बुद्धौ सत्यां प्रवर्त्तते॥ सुषुप्तौ नास्ति तन्नाशे तस्माद्बुद्धेस्तु नात्मनः॥२३॥ प्रकाशोर्कस्य तोयस्य शैत्यमग्नेर्यथोष्णता॥ स्वभावः सच्चि

अज्ञानवशान्मानसमेव उपाधिः तस्यैव कर्तृत्वादयो धर्माः ते तत्र ज्ञानवशादात्मनि कल्प्यंते। यथांभसः चलनादिकं अंबुनि प्रतिबिंबिते चंद्रमसि अविवेकतः
कल्प्यंते तद्वदात्मनीत्यर्थः॥२२॥ इच्छाद्वेषसुखदुःखादीन् आत्मधर्मान्मन्यंते वैशेषिकादयः तान्निराकरोति॥ रागेच्छासुखदुःखादिकं सर्वं बुद्धेरेव नात्मा
त्मनः कथं जाग्रत्स्वप्नयोर्बुद्धौ सत्यां प्रवर्त्तते सुषुप्तौ तस्याः बुद्धेर्नाशे मतिकारणे लीने प्रवर्त्तते॥ तस्माद्बुद्धेरेव धर्माः न आत्मधर्मा इत्यर्थः॥२३॥
तर्हि आत्मनः कीदृक् स्वभावः इत्याशंक्य आत्मस्वभावमनुपदिशति॥ यथा प्रकाशो रवेः अर्कस्य स्वभावः तोयस्य शैत्यं अग्नेरुष्णता तथा आत्मनो
पि सच्चिदानंदनित्यनिर्मलतात्मस्व भावः॥ स्वरूपमित्यर्थः॥२४॥ ॥राम॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यद्यप्यविकार्यात्मा तर्हि जानातीति प्रत्ययः कथमित्यपेक्षायामाह॥ प्रत्यगात्मन्यच्चिदंशश्च अंशद्वयं अंशाः आभासः बुद्धेर्वृत्तिस्त्वयाऽतद्द्वयमविवेकेन संयोज्य असंगस्यात्मनः केनापि संगो नास्त्येव तथाप्यज्ञानवशान्मेलनं संपाद्य जानातीति प्रत्ययः अहंकारः प्रवर्तते केवले प्रत्यगात्मनि न किंचिद्विकारोस्तीति भावः॥२५॥ एतदेव स्पष्टयति॥ आत्मा स्वभावादेवाविकारः अतः बुद्धेः कदाचिदपि बोधांशो केवनास्ति तथापि जीवः साभासाहंकारः सर्वसाभासांतःकरणवृत्तीनां एकत्रलक्षायःपिंडवत् एकत्र संततमेव मलमर्थं ज्ञात्वाऽहं करोम्यहं पश्यामीति मुह्यति भ्रांतो भवतीत्यर्थः॥२६॥ आत्मा स्वयमेव स्वस्मिन्नविवेकेन अन्यधर्मो नारोप्य बीभेतीत्यर्थः॥ यथांधकारादौ विकाररहितरज्ज्वां सर्पारोपणं कृत्वा भयकंपादिकं वहेत्॥ एव

आत्मनः सच्चिदंशश्च बुद्धेर्वृत्तिरिति द्वयं॥ संयोज्य चाविवेकेन जानामीति प्रवर्तते॥२५॥ आत्मनो विक्रिया नास्ति बुद्धेर्बोधो न जात्विति॥ जीवः फलं त्वमेतं ज्ञात्वा कर्ता दृष्टेति मुह्यति॥२६॥ रज्जुसर्पवदात्मानं जीवो ज्ञात्वा भयं वहेत्॥ नाहं जीवः परात्मेति ज्ञातश्चेन्निर्भयो भवेत्॥२७॥ आत्मावभासयत्येको बुध्यादीनिंद्रियाणि च॥ दीपो घटादिवत्स्वात्मा जडैस्तैर्नावभास्यते॥२८॥ स्वबोधे नान्यबोधेच्छा बोधरूपतयात्मनः॥ न दीपस्यान्य

मात्मनि स्वस्मिन् जीवत्वमारोप्य सद्वितीयं परिच्छिन्नं ज्ञात्वा आत्मा सुखसागरे मग्नो भवति॥ यदा शास्त्राचार्यप्रसादेन शास्त्रार्थज्ञानं उत्पन्नं भवति तदा विवेकचक्षुषा स्वात्मानमखंडानंदज्ञानैकरूपं संपश्यन् ततो नाहं जीवः परमात्माहमिति ज्ञात्वा भयदुःखादिरहितः सुखी भवेत्॥२७॥ नन्वात्मत्वेन समीपगे बुद्धिमनोहंकारादिभिः कथं नावलोक्यते न ज्ञायते तत्राह॥ आत्मा केवल एव सन्नपि बुद्धिमनोहंकारादीन् अवभासयति ते जडैर्मन आदिभिरात्मा नावभास्यते यथा दीपो घटादीन् भासयते नहि घटादिभिः दीपो भास्यते तद्वदित्यर्थः॥२८॥ आत्मा बुद्धिहंकारादिभिः नावभास्यते यदि तर्हि आत्मज्ञाने ज्ञानांतरेणापेक्षेति स्यान्नित्याशंक्याह॥ आत्मा बोधरूपत्वात् स्वबोधे नित्यं सति तस्यात्मबोधाय ज्ञानांतरापेक्षा नास्त्येव अनुभवस्वप्रत्वात् तथा दीपस्य स्वप्रकाशने दीपांतरापेक्षा नास्ति तद्वदित्यर्थः॥२९॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रत्म
॥४॥ यदि शुध्यादिभिरात्मा ज्ञेयो न भवेत्। तर्हि अत्मज्ञाने उपायांतरं ज्ञानत्वं सरूपायः कथमित्यत आह॥ अथात आदेशो नेति नेतीत्यनन्तनिरसनेन वेदवाक्यैर्निखिलोपाधी
न्निषिध्य अनात्मानं ज्ञात्वा निरस्य तत्वमसीत्यय मात्मा ब्रह्म तद्योहं हंसो सोहं सो सो हमित्यादि वाक्यैर्लक्षणया ब्रह्मात्मैकत्वज्ञानं विद्यात् प्राप्नुयात्
अनेन प्रकारेण ज्ञातव्यमित्यर्थः॥२०॥ आत्मस्वरूपज्ञानेन तन्निरसनाभावे का क्षितिरित्याशंक्य अतन्निरसनाभावे आत्मा ज्ञातुं न शक्यः यथा नाय
सर्प इति आरोपितस्य अपाकरणाभावे रज्जु ज्ञानं नोत्पद्यते तद्वत् नात्मन्निरसनाभावेनात्मा ज्ञायत इत्याशंक्य नाहं देहेंद्रियादि सर्वं दृश्यं जातं अ
विद्यकं दृश्यत्वात् बुद्बुदवत् अस्थिरं नश्वरं च तद्विलक्षणं निर्मलं निरुपाधिकं नित्यमेकं सच्चिदानंदात्मकं ब्रह्मैवाहमस्मीति विद्यात् ततः फलत्योभय

+ ॥देहात्मत्वात्मभेजन्मजरा कार्शालयादयः॥ शब्दादिविषयैः संगो निरींद्रियतया नि च॥२४॥ + निषिध्य सकलोपाधीन्नेति नेतीति वाक्यतः॥ विद्यादैक्यं
महावाक्यैः जीवात्मपरमात्मनोः॥२०॥ अविद्यकं शरीरादि दृश्यं बुद्बुदवत् क्षरं॥ एतद्विलक्षणं विद्यादहं ब्रह्मेति निर्मलं॥२१॥ + अप्राणो ह्यम
नाः शुद्धः अक्षरात्परतः परः॥ तस्माज्जायते प्राणो मनः सर्वेंद्रियाणि च॥२२॥ निर्गुणो निष्क्रियो नित्यो निर्विकल्पो निरंजनः॥ निर्विकारो नि
राकारो नित्यमुक्तोस्मि निर्मलः॥२४॥

तीत्यर्थः॥२१॥ एवमुक्तरीत्यात्मानमद्वयानंदं ज्ञात्वा कार्यं ज्ञानेन अपरोक्षतया ज्ञात्वा स्वानुभवात् ब्रह्मैवाहमिति अत्मन्येवात्मना मननप्रकारमाह पंचभिः॥ अतो
जडदृश्यत्वादि स्वभाव स्थूलशरीरादन्यत्वात्मे जन्मजराकार्श्यलयादयो न संति इंद्रियादिभिः संगत्वान्मे शब्दादि विषयभोगैः संगानुभवात्स्येव
अमनस्त्वान्मे न दुःखरागद्वेषादयो संति अप्राणो ह्यमना इत्यादि श्रुतेः॥२२॥ कथमिंद्रियप्राणमनसां भासत्याशंक्य अस्मिन्नप्रमाणयति॥ एवं वायुर्जो
तिरापश्च पृथ्वी विश्वस्य धारिणी॥ स्पष्टोर्थः॥२३॥ गुरोः प्रसादात्स्वानुभवसिद्धमर्थं चाभिनयति॥ अहं निर्गुणः बुध्याद्यभावात् निष्क्रियः इंद्रियाद्यभा
वात् नित्यः अपेक्षयाभावात् निर्विकल्पः संकल्पविकल्पाभावात् निर्मलत्वान्निरंजनः निर्विकारः असंगत्वात् षोडषकलात्मलिंगदेहशून्यत्वात्

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

8

न तु प्रयोजनैर्हेतुभिः एवंविशिष्टं रूपमतीतमित्युक्तं तत्किं विशिष्टमित्याशंक्याह ॥ आकाशवत्सर्वस्य द्वयजातस्य बहिरंतर्गतः अच्युतः च्युतिरहितः सदा सर्वसमः विषमेष्वपि समं व्याप्य स्थितः तथापि शुद्धः निर्लेपः अचलः पूर्णस्य चलनाभावात् ॥ ३५ ॥ एकं अखंडानंदं द्वितीयाभावात् अद्वयं सत्यं ज्ञानमनंतं ब्रह्मेति श्रुत्या प्रतिपाद्येन तत्परं ब्रह्मैवाहमस्मीति स्वरूपलक्षणं कथितं ॥ ३६ ॥ पूर्वश्लोकोक्तं मननप्रकारं चिरकालाभ्यस्तं सत्पुरुषार्थं साधयतीत्याह ॥ एवमुक्तप्रकारेण ब्रह्मैवास्मीति नैरंतर्येण चिरकालाभ्यस्ता वासना अविद्या तत्कृतचित्तविक्षेपान् निःशेषतो नाशयति यथा रसायणं ॥ औषधं चिरकालसेवितं सत् रोगान् निःशेषतो नाशयति ॥ तद्वदित्यर्थः ॥ ३७ ॥ विविक्ते ब्रह्मानुसंधानेन नियममाह ॥ विविक्तदेशे जनसंबंधवर्जिते देशे

अहमाकाशवत्सर्वबहिरंतर्गतोच्युतः ॥ सदा सर्वसमः शुद्धो निःसंगो निर्मलोचलः ॥ ३५ ॥ नित्यशुद्धविमुक्तैकमखंडानंदमद्वयं ॥
सत्यं ज्ञानमनंतं यत्परं ब्रह्माहमेव तत् ॥ ३६ ॥ एवं निरंतरं कृत्वा ब्रह्मैवास्मीति भावना ॥ हरत्यविद्याविक्षेपान् रोगानिव रसायणं ॥ ३७
विविक्तदेश आसीनो विरागो विजितेंद्रियः ॥ भावयेदेकमात्मानं तमनंतमनन्यधीः ॥ ३८ ॥ आत्मन्येवाखिलं दृश्यं प्रविलाप्य धिया सुधीः
॥ भावयेदेकमात्मानं निर्मलाकाशवत्सदा ॥ ३९ ॥ रूपवर्णादिकं सर्वं विहाय परमार्थवित् ॥ परिपूर्णचिदानंदस्वरूपेणावतिष्ठते ॥ ४० ॥

आसीनः सुखोपविष्टः विरागः सर्वत्रगताभिलाषः अलए च निर्जितानींद्रियाणि येन सः अनंतं अपरिछिन्नं अद्वयं एकं तमात्मानं अनन्यधीः अल्पप्प
३८ चस्थितानि स्वत्वात्मिकाबुद्धिर्यस्य तादृशो भावयेत् ध्यायेत् ॥ नं दृश्यप्रपंचे जाग्रति कथमेकत्वभावना संभवतीत्यत आह ॥ अखिलं दृश्यजातं सुधीः शुद्धांतःकरणः सन् शुद्धया धिया आत्मन्येव समाधिसमये प्रविलाप्य प्रकर्षेण नाशयित्वा तदा द्वितीयाभावादेकमात्मानं निर्मलाकाशवत्स्वच्छो स्वाकाशवत् भावयेत् चिंतयेत् ॥ ३९ ॥ परमार्थदर्शी मुनिः नामरूपात्मकं अविद्यकं सर्वं विहाय परिपूर्णज्ञानानंदरूपेणावतिष्ठतीत्याह ॥ स्पष्टार्थः ॥ ४० ॥ श्रीराम ॥ गोविंद गोपाल ॥ नारायण ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अत्म

॥ ५ ॥

नन्वप्रमात्रादित्रिपुटिज्ञानवर्तमानमुपलभ्यते कथमेकत्वभावनेत्याशंक्य परमात्मनि भेदो नास्तीत्याह ॥ ज्ञातृज्ञानज्ञेयभेदः परमात्मनि न विद्यते स्व
भेदः कल्पितात्मन्येव भाति । ज्ञानानंदैकरूपत्वादात्मा स्वयमेव दीप्यते प्रकाशते ॥ ४१ ॥ एवं विशुद्धवस्तुध्यातुः प्रत्यक्षमलमाह ॥ आत्मारणौ आत्मां
तःकरणमेव अरणिः तस्मिन्मनस्येव उत्तरारणिः ध्यानेन तयोः मथनेन सर्वदा कृतेन बोदिता ज्वाला स्वरूपावगतिर्ज्ञानं विद्यादज्ञानमेवैधनं
मूलाज्ञानं निःशेषतः सपरिकरं नाशयति तदा मुमुक्षुः स्वाराज्येभिषिक्तः कृतकृत्यो भवतीत्यर्थः ॥ ४२ ॥ जीवपरमात्मनोरत्यंतभेदस्य ज्ञानेन
अविद्यापरिकल्पितांधतमसे निःशेषमपयाते सति परमात्मा स्वयमेवाविर्भवेदित्याह ॥ अरुणप्रकाशेनादौ अंधकारक्षये अंशुमान्

ज्ञातृज्ञानज्ञेयभेदः परे नात्मनि विद्यते ॥ चिदानंदैकरूपत्वाद्दीप्यते स्वयमेव हि ॥ ४१ ॥ एवमात्मारणौ ध्यानमथने सततं कृते ॥ उदितावगति
र्ज्वाला सर्वाज्ञानेधनं दहेत् ॥ ४२ ॥ अरुणेनैव बोधेन पूर्वं संतमसे हृते ॥ तत आविर्भवेदात्मा स्वयमेवांशुमानिव ॥ ४३ ॥ आत्मा तु सततं प्राप्तो
प्यप्राप्तवदविद्यया ॥ तन्नाशे प्राप्तवद्भाति स्वकंठाभरणं यथा ॥ ४४ ॥ स्थाणौ पुरुषवद्भ्रांत्या कृता ब्रह्मणि जीवता ॥ जीवस्य तात्त्विके रूपे तस्मि
न्दृष्टे निवर्तते ॥ ४५ ॥ तत्त्वस्वरूपानुभवादुत्पन्नं ज्ञानमंजसा ॥ अहं ममेति चाज्ञानं बाधते दिग्भ्रमादिवत् ॥ ४६ ॥ श्रीराम

या आविर्भवेत्तद्वदात्मापीत्यर्थः ॥ ४३ ॥ आत्मा सर्वदा परोक्षस्वभावत्वात्प्राप्त एव सः आत्मा कथं प्राप्तो भवतीति निष्प्राप्तिभ्रमेणाह ॥ आत्मा
सर्वत्र परिपूर्णः अद्वयानंदरूपः सर्वदा प्राप्त एव अविद्यावशाद्भ्रांत्या अप्राप्त एव भाति । तन्नाशे तदावरणविद्यानाशे वा कंठस्थवर्णात्प्राप्त
इव भाति कंठगतचामीकरस्यापि येनेत्यर्थः ॥ ४४ ॥ ननु जीवपरमात्मनोः नैकत्वं युक्तं जीवत्वविरोधात् स्वभावस्यापरिहार्यत्वादित्याह ॥ यथा ध
स्थिते स्थाणौ पुरुषोयमिति चारश कस्याचिद्भ्रांतिः तथैव ब्रह्मणि अविवेकेन जीवत्वमारोप्यते अथ शास्त्रोपदेशजनितविवेकदृष्ट्या तस्य जीव
स्य तात्त्विके रूपे लब्धे तत्त्वपदार्थज्ञानेन कल्पितं तज्जीवत्वमपि निवर्तते ब्रह्मैवाहमिति जानातीत्यर्थः ॥ ४५ ॥ अहं ममेति प्रत्यये जाग्रति क

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अहंममेतिप्रत्ययेन ह्येयो योगी सम्यक्किंज्ञानवान्सन्विज्ञानचक्षुषा सर्वं दृश्यं प्रपंचं स्वात्मन्येव अभेदेन प्रपश्यतीत्याह॥ एकमात्मानं सर्वं प्रपश्यति ज्ञा
नतत्कृत्स्नो भवतीति भावः॥४७॥ न च आत्मा सर्वं न भवति कुत्र सविशेषत्वात् नानात्वेन दृश्यमिदं सर्वं कथमात्मत्वमभेदेन प्रपश्यतीत्यत आह॥ इदं सर्वं जगदा
त्मैव आत्मकार्यत्वात् अतो अन्यदात्मनो न किंचिद्विद्यते यथा मृद्घटशरावादि मृत्कार्यं मृदोऽन्यन्नास्ति॥ अतः स्वात्मन्येव सर्वं दृश्यजातं अभेदेनेक्ष
ते पश्यति॥ वाचारंभणं विकारो नामधेयं मृत्तिकेत्येव सत्यमिति श्रुतेः॥४८॥ एवं ज्ञातवतस्तु जीवन्मुक्तिरित्याह॥ अनाद्यविद्यापरिकल्पितान् पूर्वोपा
धीन् गुणान् सत्त्वादीन् परिसमेदिति तदैव जीवन्मुक्तिरित्युच्यते॥ सच्चिदानंदादिगुणकत्वात् भ्रमरकीटवत् साक्षाद्ब्रह्मरूपेणैव भवतीत्यर्थः॥४९॥

सम्यग्विज्ञानवान्योगी स्वात्मन्येवाखिलं स्थितं॥ एकं च सर्वमात्मानमीक्षते ज्ञानचक्षुषा॥४८॥ आत्मैवेदं जगत्सर्वमात्मनोन्य
न्न विद्यते॥ मृदो यद्वद्घटादीनि स्वात्मानं सर्वमीक्षते॥४९॥ जीवन्मुक्तस्तु तद्विद्वान्पूर्वोपाधिगुणांस्त्यजेत्॥ सच्चिदान
न्दरूपत्वात् भवेद्भ्रमरकीटवत्॥४९॥ तीर्त्वा मोहार्णवं हत्वा रागद्वेषादिराक्षसान्॥ योगी शांतिसमायुक्तो आत्मारामो
विराजते॥५०॥ बाह्यानित्यसुखासक्तिं हित्वात्मसुखनिर्वृतः॥ घटस्थदीपवच्छश्वदंतरेव प्रकाशते॥५१॥ श्रीराम॥

ततः स्वात्मारामः सुखं तिष्ठतीत्याह॥ मोहो एव अर्णवः अपरिमितत्वात् तं ज्ञानरूपेण तीर्त्वा निःशेषतो नाशयित्वा रागद्वेषादयः एव राक्षसाः मोक्ष
परिपंथिनः तान् निःशेषतो नाशयित्वा शांतिसमायुक्तः शमादिसहितः आत्मारामः आत्मन्येव क्रीडायुक्तः सन् विजयते॥ स राज्ये नृपो भिषि
क्तः प्रकाशते आचार्यो लरघवन्दते॥ श्रीरामस्यारामः समुद्रं तीर्त्वा रावणादिराक्षसान् हत्वा सीतेव शांतिः तया समेतः विराजे॥५०॥
जीवन्मुक्तस्य लक्षणमाह॥ बाह्येंद्रियविषयोद्भवानित्यसुखस्य असक्तिं प्रीतिं सर्वासां वासनानां हित्वा तत्र हेतुः॥ आत्मसुखेन नि
र्वृतः घटस्थदीपवदंतरेण प्रकाशते॥ स सात्त्विकमेवात्मानुभवसुखं अंतरेण न ज्ञापयेदित्यर्थः॥५१॥ श्रीगोविंद दामोदर माधव

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एवमुक्तप्रकारेण जीवन्मुक्तस्य प्रारब्धक्षयपर्यंतं वर्तनं व्यमित्याह॥ देहाद्युपाधीसाक्षित्वे न स्थितोपि मुनिः व्योमवत् तद्धर्मैर्नानुलिप्तः मम कर्मलो
पो नास्तीति भावयेत् सर्वज्ञोपि मूढवत् अफलवत्तिष्ठेत् सर्वविषयेषु यदृच्छया प्राप्तेषु नासक्तो वायुवच्चरेत्॥५२॥ आत्मा नियतः प्रारब्धक्ष
याद्देहाद्युपाधौ विलीने विदेहकैवल्यमाह॥ उपाधिफलदेहद्वयस्य प्रारब्धकर्मसंक्षये मुनिर्योगी विष्णौ सर्वव्यापके परब्रह्मणि निर्विशेषं
यथाप्रवति तथा विशेत्॥ अत्र त्यतेके दृष्टांतः जले जलमिति ब्रह्मणः सर्वातिशायत्वं स्थूलत्वेन नाभिधत्ते श्लोकद्वयेन॥५३॥ यद्ब्रह्मसा
क्षात्कारलाभादपरो लाभो न विद्यते सर्वलाभानां तत्रैवांतर्भावात् यथाब्रह्मानंदे क्षुद्रानंदानामंतर्भावः॥ यत्सुखाद्ब्रह्मानुभवसु

उपाधिस्थोपि तद्धर्मैरलिप्तो व्योमवन्मुनिः॥ सर्वविन्मूढवत्तिष्ठेदसक्तो वायुवच्चरेत्॥५२॥ उपाधिविलयेद्विष्णौ निर्विशेषं विशेन्मुनिः॥ जले जलं वि
यद्व्योम्नि तेजस्तेजसि वा यथा॥५३॥ यल्लाभान्नापरो लाभो यत्सुखान्नापरं सुखं॥ यज्ज्ञानान्नापरं ज्ञानं तद्ब्रह्मेत्यवधारयेत्॥५४॥ यद्दृष्ट्वा नापरं दृश्यं
यद्भूत्वा न पुनर्भवः॥ यज्ज्ञात्वा नापरं ज्ञेयं तद्ब्रह्मेत्यवधारयेत्॥५५॥ तीर्यगूर्ध्वमधः पूर्णं सच्चिदानंदमद्वयं॥ अनंतं नित्यमेकं यत् तद्ब्रह्मेत्यवधारयेत्॥५६॥
अतद्व्यावृत्तिरूपेण वेदांतैर्लक्ष्यतेद्वयं॥ अखंडानंदमेकं यत्तद्ब्रह्मेत्यवधारयेत्॥५७॥ अखंडानंदरूपस्य तस्यानंदलवाश्रिताः॥ ब्रह्माद्यास्तार

दपरं सुखं नास्ति निरतिशयसुखत्वात् यज्ज्ञानात् ब्रह्मसाक्षात्कारात् अपरं ज्ञानं नास्ति॥ मोक्षहेतुत्वात् तद्ब्रह्मेति जानीयात्॥५४॥ यद्दृष्ट्वा परं दृ
श्यं नास्ति तेनैव परमपुरुषार्थत्वात् तद्भूत्वा येनैक्यं गत्वा पुनर्गर्भजन्मादिकं नास्ति यज्ज्ञात्वा यत्स्वरूपं ज्ञात्वा अन्यज्ज्ञेयं नास्ति॥ तद्ब्रह्मेत्यव
धारयेत्॥ अन्यत्सर्वं व्याप्य उत्पन्नमित्यर्थः॥५५॥ सर्वत्र ब्रह्मैव पूर्णमित्याह॥ स्पष्टार्थः॥५६॥ अखंडानंदमेकं ब्रह्म वेदांतैरतद्व्यावृत्तिरूपेरतान्नि
रासनेन ज्ञातव्यमित्याह॥ स्पष्टार्थः॥५७॥ ननु ब्रह्मादयो निरतिशयानंदा न वेत्यपेक्षायामाह॥ ब्रह्मेंद्रादयः परिच्छिन्नानंदिन एव ब्रह्म तु अखंडा
नंदरूपत्वाद् परिच्छिन्नानंदं एवं रूपस्य तस्यानंदलेशमाश्रित्य ब्रह्मेंद्रादयोप्यानंदिनो भवंति॥ अनंदतारतम्येन रालेस्यैवानंदस्यान्यानि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

परमं देहमात्रस्य दत्तया आत्मैव भातीत्यन्वयेन तदुक्तं अनात्मापि देहादिप्रपंचः प्रियमरश्यत्वत इत्याशंक्याह ॥ अखिलं देहाद्यनात्मवस्त्वपि तदुक्तं वेनात्म
नासंयुक्तमेवृष्टिपतमं लोकिकोपि व्यवहारस्तद्युक्तमेवृष्टियक्तः ॥ तस्मात्सर्वगतं ब्रह्म अत्यंतं प्रियपयथा क्षिरे सर्वं व्याप्य घृतमेवं तथा जगत्सर्वमपि ब्रह्म
व्यापत्वात् प्रियमिवृभाति ॥ अतः आत्मैव प्रियतमं इति सिद्धं ॥५८॥ तर्हि आत्मा केन प्रकारेण सर्वव्याप्य तिष्ठतीति जानीमः इत्याशंक्य मालाद्वकु
मशक्यं अणुत्वस्थूलत्व मितिप्तुते ॥ सत्तारूपेण आत्मा तीत्याह ॥ स्पष्टार्थः ॥५९॥ पुनस्तद्ब्रह्मज्ञानार्थं श्लोकत्रयेण प्रायकृत्वानिरूपयति ॥ तद्ब्रह्मस्तुभाना

तद्युक्तमखिलं वस्तु व्यवहारस्तदन्वितः ॥ तस्मात्सर्वगतं ब्रह्म क्षीरे सर्पिरिवाखिले ॥ अनण्वस्थूलमह्रस्वमदीर्घ
मजमव्ययं ॥ अरूपगुणवर्णाख्यं तद्ब्रह्मेत्यवधारयेत् ॥६०॥ यद्भासा भास्यतेर्कादि भास्यैर्यत्तु न भास्यते ॥ येन स
र्वमिदं भाति तद्ब्रह्मेत्यवधारयेत् ॥६१॥ स्वयमंतर्बहिर्व्याप्य भासयत्यखिलं जगत् ॥ ब्रह्म प्रकाशते वह्नि प्रतप्ताय
सपिंडवत् ॥६२॥ जगद्विलक्षणं ब्रह्म ब्रह्मणोन्यन्न किंचन ॥ ब्रह्मान्यद्भाति चेन्मिथ्या यथा मरुमरीचिका ॥६३॥

दीन् भासयेत् यच्च भास्यैरकार्यादिभिः न भास्यते न तत्र सूर्यो भाति न चंद्रतारकं नेमा विद्युतो भांति कुतोयमग्निः तमेव भांतमनुभाति सर्वं तस्य भासा सर्व
मिदं विभातीति श्रुतेः तथा च ॥ नचंद्रतारा न विभावसुर्महज्ज्योतिरेव न च मारुतोपि ॥ एकेवलं वस्तु विचारितोपि सत्स्मात्परं सूक्ष्मपरात्परं च ॥६१॥ येन सर्व
मिदं प्रत्तेजोतिकं स्थावररूपं जगज्ज्ञाति ॥ तद्ब्रह्मेति जानीयात् तप्तायःपिंडवत् स्वयमेवांतर्बहिर्व्याप्याखिलं ब्रह्म प्रकाशते त्याह ॥ स्पष्टार्थं ॥६२॥ पुनस्तदेवाह ॥
सर्वं ब्रह्मैव सत्यं तथापि जगद्रूपेण यदापतितं तदा रज्ज्वां ॥ जगद्विलक्षणेन तत्कार्यत्वेन विचार्यतेऽन्वेषणात् तु अन्यत्कंचं ब्रह्मणोऽन्यन विद्यते स्वदितं तोन्यं दृश्यते य

[illegible] ॥६४॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

म०

६।।

प्रनस्तदेवस्फुटं निरूपयति।। चक्षुषा यद्दृश्यते श्रूयते यज्जन्मनसा स्मर्यते वा वा अभिधते तत्सर्वं ब्रह्मसच्चिदानंदमद्वयं ब्रह्मणो
न्यं न किंचिदस्तीत्यर्थः।।६४।। यदि सर्वगतं ब्रह्म तत्सर्वैः किं न दृश्यते इत्याशंक्य चक्षुरादिभिः न गृह्यते इत्येतत्स्फुटयो यन्नि पादयति।। न चक्षुषा
गृह्यते नापि वाचा नान्यैर्देवैस्तपसा कर्मणा वा ज्ञानप्रसादेन विशुद्धसत्त्वस्ततस्तु तं पश्यति निष्कलं ध्यायमानः इति श्रुतेः। नन्वज्ञः सर्व
गमपि सच्चिदानंदरूपं ब्रह्म न पश्यति। तथा प्रकाशमानमपि भानुमंधवन्न पश्यति ज्ञानप्रदेन चक्षुषा विशुद्धसत्त्वः निर्दिध्यासितः सदा सर्वत्र

।।दृश्यते श्रूयते यद्यद्ब्रह्मणोन्यं न [illegible] तत्त्वज्ञानाच्च तद्ब्रह्म सच्चिदानंदमद्वयं।।६४।।
सर्वगं सच्चिदात्मानं ज्ञानचक्षुर्निरीक्षते। अज्ञानचक्षुर्नेक्षेत भास्वंतं भानुमंधवत्।।६५।।
श्रवणादिभिरुद्दीप्तज्ञानाग्निपरितापितः। जीवः सर्वमलान्मुक्तः स्वर्णवद्द्योतते स्वयं।।६६
हृदाकाशोदितो ह्यात्मा बोधभानुस्तमोपहृत्। सर्वव्यापी सर्वधारी भाति सर्वं प्रकाशयन्।

त्मसेव पश्यतीत्यर्थः।।६५।। एतावद्दुक्तरीत्या अनुभवसंपन्नस्यापि तदभ्यासरहितस्यापि वासनावशात् किंचिदज्ञानं संभवति।। यच्च [illegible] पुनः
श्रवणादिकं कुर्यात् तदा नित्यमाह।। जीवः प्रत्यगात्मा एवं प्रकारेणोक्तस्यार्थस्य श्रवणमननादिभिः उद्दीप्तः प्रकाशितः ज्ञानमेवाग्निः तेन
परितापितः परितो भावितः शोधित इत्यर्थः। सर्वसंसारमलेभ्यः तत्कारणाज्ञानमलान्मुक्तः स्वयमेव न [illegible] प्रकाशते।। अथ ज्ञानिनां परि
तापितं स्वर्णं औपाधिकं हित्वा स्वरूपेण प्रकाशते इत्यर्थः।।६६।। एवं शोधितो जीवः परमात्मा हृदाकाशोदितः सन् तमः अज्ञान

सटी

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

राम
८

बोधात्मभानुः सर्वाधारभूतत्वात् सर्वव्यापि सर्वधारित्वं शोभस्पष्टं ॥६७॥ नन्वात्मनो ज्ञानप्रतिबंधनाः परिहारार्थं प्रयागादितीर्थे उद्योगः कर्तव्यः ॥
इत्याशंक्य आत्मतीर्थे स्नातस्य न किंचित्कर्तव्यमस्तीत्याह ॥ योगवित्परमहंसः स्वात्मतीर्थं भजते विनिष्क्रियः यः सर्ववित्स च सर्वगतः परमात्म-
स्वरूपत्वात् अमृतो मुक्तो भवेत् कथंभूतं स्वात्मतीर्थं दिग्देशकालाद्यनपेक्ष्यैव सर्वगं शीतादि द्वंद्वदुःखानि हरतीति शीतादिहृत् ॥ नित्यसुखं मो-
क्षानंदत्वात् ॥ इतरतीर्थे भ्रंतहि परीतं दृष्टं ॥ तस्मात्स्वात्मतीर्थे रतस्य न किंचिदवशिष्यत इति ज्ञेयं ॥६८॥ इति श्रीपरमहंसपरिव्राजका-

॥ दिग्देशकालाद्यनपेक्ष्य सर्वगं शीतादिहृन्नित्यसुखं निरंजनं ॥ यः स्वा-
त्मतीर्थं भजते विनिष्क्रियः स सर्ववित्सर्वगतोऽमृतो भवेत् ॥६८॥ श्रीराम

चार्यगोविंदभगवत्पूज्यपादशिष्यश्रीशंकराचार्यविरचितमात्मबोधप्रकरणं समाप्तं ॥ ॥ गृहधर्माश्रितो विद्वान् अज्ञानाचरितं
चरेत् ॥ संदिग्धः सर्वभूतानां लिंगाश्रमविनिर्जितः ॥१॥ धनाशोकास्पृहालज्जानुपसाचेति पंचमी ॥ कुलं शीलं तथा जातिरष्टौ पाशाः
प्रकीर्तिताः ॥२॥ यावद्द्वेष्यभोगाशा जीवाख्यादायात्मनः ॥ अविवेकेन संपन्ना यासा प्यासनतुस्वतः ॥३॥ अहं ममेत्येव भवस्य बी-
जं न मे न चाहं भव बीजनाशः ॥ बीजे प्रनष्टे कुतराव जन्म निरंधनो वन्हिरयथोपशाम्यति ॥५॥ काश्यपस्य कुले लक्ष्मीरबुधाहृद्युते

K K S U LIBRARY
RAMTEK
441 106
M 1087
Dist. Nagpur

(89)

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[OrderDescription]
,CREATED=05.10.20 11:55
,TRANSFERRED=2020/10/05 at 11:57:43
,PAGES=14
,TYPE=STD
,NAME=S0003844
,Book Name=M-1027-AALBODH
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection